**आमर्द्दिन्** त्रि० आ+मृद–णिनि । बलान्निष्पीड़के ।

**आमर्श** पु० आ+मृश–स्पर्शे घञ् । सम्यक्स्पर्शे । ल्युट् । आमर्शनमप्यत्र न० ।

**आमर्ष** पु० न+मृष–घञ् "अन्येषामपि" पा० दीर्घः । १कोपे असहने । "निरुद्योगं निरामर्षं निर्वीर्य्यमरिनन्दनम्" नीतिशा० आ+मृष–घञ् । २सम्यग्विवेके च ।

**आमलक** त्रि० आ+मल–क्वुन् स्त्रीत्वे गौरा० ङीष् । (आमला) १धात्रीवृक्षे ।"त्रिष्वामलकमाख्यातं धात्री तिष्यफलाऽमृता । रक्तपित्तप्रमेहघ्नं पथ्यं वृष्यं रसायनम् । हन्ति वातं तदम्लत्वात् पित्तं माधुर्य्यशैत्यतः । कफं रूक्षकषायत्वात् फलं धात्र्यास्त्रिदोषजित् । यस्य यस्य फलस्येह वीर्य्यं भवति यादृशम् । तस्य तस्यैव वीर्य्येण मज्जानमपि निर्द्दिशेत्" भावप्रका०अस्य स्त्रीत्वपक्षेऽपि तस्याः इदम् फलमण् फले लुकि क्लीवत्वमेवेति भेदः । "यः सदामलकैः स्नानं करोति स विनिश्चितम् । बलीपलितनिर्मुक्तोः जीवेद्वर्षशतं नरः"वैद्य०"श्रीकामः सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः" गरुड़ पु० । गौरादिगणे आमलशब्दपाठात् आमलशब्दोऽप्यत्र स्त्रीत्वे गौरा० ङीष् आमली । वृहन्न० पुराणे तु अमलात् कात् नेत्रजलादागतम् अण्ङीप् । इत्यभिप्रायेण निरुक्त्यन्तरम् दर्शितं यथा "सजये ! विजये ! देवि ! नावेव स्तुतयोस्तदा । नयनेषु च जातानि अमलाम्बुजलानि च । तानि नौ नयनेभ्यश्च निपेतुर्भुवि हे सखि ! । ततो जाताद्रुमाः पृथ्व्यां चत्वारोविमलप्रभाः । ख्याता आमलकी नाम्ना जाता कादमलाद्यतः । श्यामलच्छदवृन्दास्ते कर्व्वूर-स्कन्धमूलकाः । शिराग्रथितपत्रालीमालाकलितपत्रकाः।" "माघेमासि सितायां तामेकादश्यां समुद्भवाम् दृष्ट्वाद्यागत्य देवोऽत्रदृघारानन्दयुक्तस्तम् । तेन धात्रीति नाम्नापि राजत्यामलकी पुनः" इति च "सर्वदामलकी ग्राह्या परित्यज्यरवेर्दिनम्" । "पयोधरैरामलकीवनाश्रिताः' माघः । "विल्वपत्रं चमाघञ्च तमालामलकीदलम् । कह्लारं तुलसी चैव पद्मञ्च मुनिपुष्पकम् । एतत् पर्य्युषितं न स्यात् यच्चान्यत् कलिकात्मकम्" योगि०त० । "न धात्रीकाननं यत्र विष्णोस्तु तुलसीवनम् । तं म्लेच्छदेशं जानीयात् यत्र नो याति वैष्णवः । यत्र मातृपरा मर्त्त्या यत्र द्वादशीव्रतनरः । तुलसीकाननं धात्री तत्र विष्णुः श्रिया सह । दूर्व्वा हरति पापानि धात्री हरति पातकम्" आह्नि०त०स्कान्द पु० ।

**आमवात** पु०आमोऽपक्वहेतुः वातः । भा०प्र० उक्ते वातव्याधिभेदे तल्लक्षणाद्युक्तं तत्रैव "युगपत्कुपितावेतौ त्रिकसन्धिप्रवेशकौ । स्तब्धञ्च कुरुतो गात्रमामवातः स उच्यते" (एतौ वातश्लेष्माणौ) तस्य लक्षणमुक्तं निदा० ।"अङ्गमर्द्दोऽरुचिस्तृष्णा ऽस्वातन्त्र्यं गौरवं ज्वरः । अपचीम्मूलजङ्गाश्लमामवातः स उच्यते" । तत्र निदानादि यथा "विरुद्धाहारचेष्टस्य मन्दाग्नेर्निश्चलस्य च । स्निग्धं भुक्तवतोऽह्यन्नं व्यायामं कुर्वतस्तथा । वायुना प्रेरितोह्यामः श्लेष्मस्थानं प्रधावति । तेनात्यर्थमपक्वोऽसौ धमनीभिः प्रपद्यते । वातपित्तकफैर्भूयो दूषितः सोऽन्नजो रसः । स्रोतांस्यभिष्यन्दयति नानावर्णोऽतिपिच्छलः । जनयत्यग्निदौर्बल्यमिन्द्रियस्य च गौरवम् । व्याधीनामाश्रयोह्येष आमसंज्ञोऽनिलोह्ययम्" ( श्लेष्मस्थानमामाशयसन्ध्यादि ) । तेन श्लेष्मस्थानगमने पाकाभावात् दूषकता पित्तस्थानगमने तु तेन पाकसम्भवान्न दोषजनकतेति । अतिवृद्धस्य लक्षणमुक्तं तत्रैव "स कष्टः सर्वरोगाणाम् यदा प्रकुपितो भवेत् । हस्तपादशिरोगुल्मत्रिकजानूरुसन्धिषु । करोति सरुजं शोफं यत्र दोषः प्रपद्यते । स देशो रुज्यतेऽत्यर्थं व्याविद्ध इव वृश्चिकैः । जनयेत् सोऽग्निदौर्बल्यम् प्रसेकारुचिगौरवम् । उत्साहहानिं वैरस्यं दाहनं बहुमूत्रताम् । कुक्षौ शूलं कठिनतां तथा निद्राविपर्य्ययम् । तृट्छर्द्दिभ्रमभूर्च्छांश्च हृद्ग्रन्थिविड्विबद्धताम् । जाड्यान्त्रकूजनानाहकुष्ठांश्चान्यानुपपद्रवान्" । तत्र दोषभेदे लक्षणानि "पित्तादृदाहं सरागञ्च सशूलं पवनात्मकम् । स्तिमितं गुरु कण्डूकं कफजुष्टं तमादिशेत् । एकदोषानुगः साध्योद्विदोषोयाप्य उच्यते । सर्वदोषगतः शोफः स कष्टः सान्निपातिकः" इति सुश्रु० ।

**आमश्राद्ध** न०आमेन अपक्वेनान्नेन श्राद्धम् । "आमन्तु वितुषं प्रोक्तमित्युक्तेण वितुषेणापक्वेनान्नेन कर्त्तव्ये श्राद्धे "आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा । आमश्राद्धं द्विजैः कार्य्यं शूद्रेण च सदैव तु" प्रचे० अत्र विशेषः "निरन्नेरामश्राद्धे तु अन्नं न क्षालयेत् क्वचित् । वृद्धौ च क्षालयेदन्नं संक्रमे ग्रहणेषु च, ति०त०पु० ।

**आमहीय** त्रि०आमहाय आगमनाय हितम् छ । आगमनसाधने मन्त्रभेदे "अपाम सोमम्" इत्यस्यामृचि स्त्री "उद्वयमित्युचेत्रोन्नीता आमहीयां जपन्तोगच्छन्त्यपाम सोममृता अभूमागन्म ज्योतिरविदाम देवान् किं नूनमस्मान् कृणदरातिः किमु धूर्त्तिरमृतमर्त्यस्येति" का० १०,६,७,